॥ वाल्मीकि रामायण॥

४ किष्किन्धाकाण्ड

अध्याय ३७

प्रतिगृह्य च तत्सर्वमुपानयमुपाहृतम् ।
वानरान्सान्त्वयित्वा च सर्वानेव व्यसर्जयत् ॥ १॥

विसर्जयित्वा स हरीञ्शूरांस्तान्कृतकर्मणः ।
मेने कृतार्थमात्मानं राघवं च महाबलम् ॥ २॥

स लक्ष्मणो भीमबलं सर्ववानरसत्तमम् ।
अब्रवीत्प्रश्रितं वाक्यं सुग्रीवं सम्प्रहर्षयन् ।
किष्किन्धाया विनिष्क्राम यदि ते सौम्य रोचते ॥ ३॥

तस्य तद्वचनं श्रुत्वा लक्ष्मणस्य सुभाषितम् ।
सुग्रीवः परमप्रीतो वाक्यमेतदुवाच ह ॥ ४॥

एवं भवतु गच्छामः स्थेयं त्वच्छासने मया ।
तमेवमुक्त्वा सुग्रीवो लक्ष्मणं शुभलक्ष्मणम् ॥ ५॥

विसर्जयामास तदा तारामन्याश्च योषितः ।
एतेत्युच्चैर्हरिवरान्सुग्रीवः समुदाहरत् ॥ ६॥

तस्य तद्वचनं श्रुत्वा हरयः शीघ्रमाययुः ।
बद्धाञ्जलिपुटाः सर्वे ये स्युः स्त्रीदर्शनक्षमाः ॥ ७॥

तानुवाच ततः प्राप्तान्राजार्कसदृशप्रभः ।
उपस्थापयत क्षिप्रं शिबिकां मम वानराः ॥ ८॥

श्रुत्वा तु वचनं तस्य हरयः शीघ्रविक्रमाः ।
समुपस्थापयामासुः शिबिकां प्रियदर्शनाम् ॥ ९॥

तामुपस्थापितां दृष्ट्वा शिबिकां वानराधिपः ।
लक्ष्मणारुह्यतां शीघ्रमिति सौमित्रिमब्रवीत् ॥ १०॥

इत्युक्त्वा काञ्चनं यानं सुग्रीवः सूर्यसंनिभम् ।
बृहद्भिर्हरिभिर्युक्तमारुरोह सलक्ष्मणः ॥ ११॥

पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
शुक्लैश्च बालव्यजनैर्धूयमानैः समन्ततः ॥ १२॥

शङ्खभेरीनिनादैश्च बन्दिभिश्चाभिवन्दितः ।
निर्ययौ प्राप्य सुग्रीवो राज्यश्रियमनुत्तमाम् ॥ १३॥

स वानरशतैस्तीष्णैर्बहुभिः शस्त्रपाणिभिः ।
परिकीर्णो ययौ तत्र यत्र रामो व्यवस्थितः ॥ १४॥

स तं देशमनुप्राप्य श्रेष्ठं रामनिषेवितम् ।
अवातरन्महातेजाः शिबिकायाः सलक्ष्मणः ॥ १५॥

आसाद्य च ततो रामं कृताञ्जलिपुटोऽभवत् ।
कृताञ्जलौ स्थिते तस्मिन्वानराश्चभवंस्तथा ॥ १६॥

तटाकमिव तद्दृष्ट्वा रामः कुड्मलपङ्कजम् ।
वानराणां महत्सैन्यं सुग्रीवे प्रीतिमानभूत् ॥ १७॥

पादयोः पतितं मूर्ध्ना तमुत्थाप्य हरीश्वरम् ।
प्रेंणा च बहुमानाच्च राघवः परिषस्वजे ॥ १८॥

परिष्वज्य च धर्मात्मा निषीदेति ततोऽब्रवीत् ।
तं निषण्णं ततो दृष्ट्वा क्षितौ रामोऽब्रवीद्वचः ॥ १९॥

धर्ममर्थं च कामं च काले यस्तु निषेवते ।
विभज्य सततं वीर स राजा हरिसत्तम ॥ २०॥

हित्वा धर्मं तथार्थं च कामं यस्तु निषेवते ।
स वृक्षाग्रे यथा सुप्तः पतितः प्रतिबुध्यते ॥ २१॥

अमित्राणां वधे युक्तो मित्राणां सङ्ग्रहे रतः ।
त्रिवर्गफलभोक्ता तु राजा धर्मेण युज्यते ॥ २२॥

उद्योगसमयस्त्वेष प्राप्तः शत्रुविनाशन ।
सञ्चिन्त्यतां हि पिङ्गेश हरिभिः सह मन्त्रिभिः ॥ २३॥

एवमुक्तस्तु सुग्रीवो रामं वचनमब्रवीत् ॥ २४॥

प्रनष्टा श्रीश्च कीर्तिश्च कपिराज्यं च शाश्वतम् ।
त्वत्प्रसादान्महाबाहो पुनः प्राप्तमिदं मया ॥ २५॥

तव देवप्रसदाच्च भ्रातुश्च जयतां वर ।

कृतं न प्रतिकुर्याद्यः पुरुषाणां स दूषकः ॥ २६ ॥

एते वानरमुख्याश्च शतशः शत्रुसूदन ।
प्राप्ताश्चादाय बलिनः पृथिव्यां सर्ववानरान् ॥ २७ ॥

ऋक्षाश्चावहिताः शूरा गोलाङ्गूलाश्च राघव ।
कान्तार वनदुर्गाणामभिज्ञा घोरदर्शनाः ॥ २८ ॥

देवगन्धर्वपुत्राश्च वानराः कामरूपिणः ।
स्वैः स्वैः परिवृताः सैन्यैर्वर्तन्ते पथि राघव ॥ २९ ॥

शतैः शतसहस्रैश्च कोटिभिश्च प्लवङ्गमाः ।
अयुतैश्चावृता वीरा शङ्कुभिश्च परन्तप ॥ ३० ॥

अर्बुदैरर्बुदशतैर्मध्यैश्चान्तैश्च वानराः ।
समुद्रैश्च परार्धैश्च हरयो हरियूथपाः ॥ ३१ ॥

आगमिष्यन्ति ते राजन्महेन्द्रसमविक्रमाः ।
मेरुमन्दरसङ्काशा विन्ध्यमेरुकृतालयाः ॥ ३२ ॥

ते त्वामभिगमिष्यन्ति राक्षसं ये सबान्धवम् ।
निहत्य रावणं सङ्ख्ये ह्यानयिष्यन्ति मैथिलीम् ॥ ३३ ॥

ततस्तमुद्योगमवेक्ष्य बुद्धिमान्
हरिप्रवीरस्य निदेशवर्तिनः ।
बभूव हर्षाद्वसुधाधिपात्मजः
प्रबुद्धनीलोत्पलतुल्यदर्शनः ॥ ३४ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com